# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 | प्रश्नपत्रम् – 6 | गुणाः – ५० |
| विषयः – रामानुजवेदान्तः | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – श्रीभाष्यम् (ईक्षत्यधिकरणतः प्रथमपादसमाप्तिं यावत्) | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः उत्तरं लिखत ।**

१ श्रीभाष्यानुगुणं 'श्रुतत्वाच्च' इतीदं सूत्रं व्याकुरुत ।
२ 'ईक्षतेर्नाऽशब्दम्' इतीदं सूत्रं भाष्योक्तदिशा व्याख्यात ।
३ भाष्यानुसारम् 'आनन्दमयोऽभ्यासात्' इतीदं सूत्रं विवृणुत ।

**प्रश्नः २ भाष्योक्तदिशा ईक्षत्यधिकरणं व्याख्यात ।**

**प्रश्नः ३ श्रीभाष्यानुसारम् आनन्दमयाधिकरणं विवृणुत ।**

**प्रश्नः ४ कयोरपि द्वयोः उत्तरं लिखत ।**

१ 'अन्तस्तद्धर्मोपदेशात्' इतीदं सूत्रं यथाभाष्यं विमर्शयत ।
२ 'भेदव्यपदेशाच्चाऽन्यः' सूत्रमिदं भाष्यकाराभिप्रायेण विशदयत ।
३ 'आकाशस्तल्लिङ्गात्' इतीदं सूत्रं श्रीभाष्यानुगुणं विवृणुत ।

**प्रश्नः ५ ग्रन्थोक्तदिशा अन्तरधिकरणं व्याख्यात ।**

**प्रश्नः ६ श्रीभाष्यानुसारम् आकाशाधिकरणं व्याकुरुत ।**

**प्रश्नः ७ कयोरपि द्वयोः उत्तरं लिखत ।**

१ 'अत एव प्राणः' इतीदं सूत्रं भाष्योक्तदिशा निरूपयत ।
२ 'छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगमात्तथा हि दर्शनम्' इतीदं सूत्रं यथाग्रन्थं व्याख्यात ।
३ 'प्राणस्तथाऽनुगमात्' सूत्रमिदं भाष्यानुगुणं विवृणुत ।

**प्रश्नः ८ भाष्योक्तदिशा ज्योतिरधिकरणं व्याख्यात ।**

**प्रश्नः ९ श्रीभाष्यानुगुणं सर्वव्याख्यानाधिकरणं व्यञ्जयत ।**

**प्रश्नः १० अधोलिखितेषु दशानां लघूत्तराणि लिखत ।**

१ ईक्षत्यधिकरणे कति सूत्राणि वर्तन्ते ?
२ ईक्षत्यधिकरणे प्रतिपादिता विद्या का ?
३ 'अशब्दम्' इति शब्देन किमुच्यते ?
४ ईक्षणक्रियायोगः कुत्र न सम्भवति ?
५ आनन्दमयाधिकरणार्थः कः ?
६ 'आनन्दमयः' इति शब्दे मयट्प्रत्ययः कस्मिन् अर्थे वर्तते ?
७ किं नाम सामानाधिकरण्यम् ?
८ अन्तरधिकरणे का विद्या उपवर्ण्यते ?
९ जीवानां शरीरसम्बन्धः किमर्थं भवति ?
१० आकाशाधिकरणे कति सूत्राणि वर्तन्ते ?
११ आकाशशब्दस्य व्युत्पत्तिः का ?
१२ प्राणाधिकरणे का विद्या प्रस्तुता ?
१३ प्राणशब्देन कः अभिधीयते ?
१४ गायत्रीविद्या कस्यामुपनिषदि उपवर्णिता ?
१५ इन्द्रप्राणाधिकरणे का विद्या उपवर्णिता ?

****